संस्कृतवार्ताः

21.03.2024

सायम् - 06:20

मुख्यवार्ता:

· सर्वोच्च-न्यायालयः मुख्य-निर्वाचनायुक्त-सम्बद्धं निर्वाचनायुक्तानां नियुक्तिसम्बद्धं च नूतनविधानम् विरुध्य आदेशं प्रदातुं स्वीकृतिं नायच्छत् ।

· निर्वाचनायोगेन संवर्गीयेतर- अधिकारिभ्य: स्थानान्तरणादेशः प्रख्यापितः ।

· दिल्ली उच्चन्यायालय: कथित-दिल्ली-आबकारी-नीति-धनशोधनप्रकरणं विरुध्य मुख्यमन्त्रिणं अरविन्दकेजरीवालं निगडनात् सुरक्षितं कर्तुं आदेशप्रदानाय स्वीकृतिः न प्रदत्तवान् ।

निर्वाचनायोगः- विकसित-भारत-संदेशं

निर्वाचन-आयोगेन व्हाट्सएप-माध्यमेन विकसित-भारत-संदेशं विरुध्य तत्काल-रूपेण तस्य प्रचाराभियानम् अवरोद्धुं सूचना-प्रौद्योगिक-मंत्रालयः निर्दिष्टः। आयोगेन प्रोक्तं यत् लोकसभा-निर्वाचनस्य घोषणानन्तरमपि नागरिकैः दूरभाषमाध्यमेन एतादृशाः सन्देशाः प्राप्ताः , इति संसूचना अस्माभिः सम्प्राप्ताः । प्रत्युत्तरं प्रयच्छता मन्त्रालयेन आयोगः संसूचितः यत् एतानि पत्राणि आदर्श-आचार-संहिता-प्रतिष्ठापनात् पूर्वं प्रेषितानि आसन् परञ्च सम्प्रेषण-प्रणाल्याः त्रुटिवशात् संभवतः एतानि पत्राणि प्राप्तकर्तृभिः चिरकालेन सम्प्राप्तानि ।

सर्वोच्च-न्यायालयः- निर्वाचनायुक्तनियुक्तिः

सर्वोच्च-न्यायालयः मुख्य-निर्वाचनायुक्त-सम्बद्धं निर्वाचनायुक्तानां नियुक्तिसम्बद्धं च नूतनविधानम् विरुध्य आदेशं प्रदातुं स्वीकृतिं नायच्छत् । न्यायमूर्तिः संजीव-खन्ना, न्यायमूर्तिः दीपंकर-दत्ता प्रोक्तवन्तौ यत् अस्मिन् समये लोकसभा-निर्वाचनं सन्निकटं वर्तते अतः , नूतन-विधानम् अवरोद्धुं स्वीकृतिं दातुं न शक्यते । पीठेन प्रोक्तं यत् संविधान-पीठस्य निर्णये कुत्रचिदपि अस्योल्लेखं न प्राप्यते यत् चयन-समित्याः सदस्याः के प्रचेतव्याः। प्रख्यापितायां याचिकायां

प्रत्युत्तरे सर्वोच्च-न्यायालयः इदमपि प्रोक्तवान् यत् नवनियुक्त-निर्वाचन-आयुक्तौ ज्ञानेश-कुमारं सुखबीर-सिंह-संधूं च विरुध्य कोऽपि आरोपः न वर्तते ।

<u>संयुक्त-राष्ट्र- ई-अवकरम्</u>

संयुक्त-राष्ट्रस्य अभिकरणैः सञ्चेना प्रख्यापिता अस्ति यत् आविश्वम् इलैक्ट्रॉनिकी इति विद्युच्चालितयन्त्राणां माध्यमेन अवकरं वरिवर्ध्यते । अस्य पुनर्चक्रणमितिः अपि न्यूना अस्ति अपि च भविष्ये इतोऽपि अधिकं नैयून्यं सम्भाव्यते । अभिकरणैः ई-अवकरं विनष्टोपकरणरूपेण परिभाष्यते । एतेषूपकरणेषु प्लग, विद्युत्कोष-दूरभाषयन्त्र-क्रीटनक-दूरदर्शनयन्त्र-ई-सिगरेट-लैपटॉप-सङ्गणक-सौरोर्जापटलानि सम्मिलितानि सन्ति। अभिकरणैः विद्युच्चालित-वाहनानि अस्यां सूच्याम् अवकररूपेण सम्मिलितानि न क्रियन्ते। संयुक्त-राष्ट्रस्य अन्तराष्ट्रिय-दूरसंचार-संघेन अनुसंधान-आर्म इति विभागेन च एकस्मिन् सूचनाप्रपत्रे प्रोक्तं यत् द्वाविंशत्युत्तर-विंशति-शत-तमाब्दे न्यूनातिन्यूनं द्विषष्टि-कोटि-टन-भारमितं ई-अवकरं संग्रहितं जातम् सहैव त्रिंशदुत्तर-विंशति-शत-तमाब्दं यावत् एतादृशानि अवकराणि द्वयशीति-कोटि-टन-परिमितानि यावत् संग्रहीतुं सम्भाव्यन्ते। ई-अवकराणां अर्धभागमेव एशियाक्षेत्रात् समुत्पद्यते। सूचनाप्रपत्रानुसारेण ई-अवकरं अस्य संग्रहं विरुध्य च केषुचिद्देशेषु विधिनियमाः अपि सन्ति । यूरोपे पुनर्चक्रणमितिः संग्रहमितिः च चत्वारिंशत्-प्रतिशन्मिततोऽधिका अस्ति । प्रतिजनम् अवकरोत्पत्तिमितिः सर्वतोऽधिका अष्टादश-किलोग्राम-मिता अस्ति ।

<u>निर्वाचनायोगः- अधिकारिस्थानान्तरणम्।।</u>

निर्वाचनायोगेन संवर्गीयेतर- अधिकारिभ्य: स्थानान्तरणादेशः प्रख्यापितः । एते अधिकारिणः चतुर्षु राज्येषु गुजरात- पञ्जाब-ओडिशा- पश्चिमबंगालेषु जनपदाधिकारीत्वेन आरक्षि-अधीक्षकत्वेन च नियुक्ताः सन्ति । अयं: निर्णय: आयोगेन मुख्य-निर्वाचनायुक्तस्य राजीव कुमारस्य अध्यक्षतायां निर्वाचनायुक्तेन ज्ञानेशकुमारेण सुखबीर सिन्धू इत्यनेन सह च सह एकस्य उपवेशनस्य अनन्तरं स्वीकृतः । एतदतिरिच्य आयोगेन अनेन पञ्जाबराज्ये बठिन्डाया: वरिष्ठ-आरक्षि- अधीक्षकः असम राज्यस्य च सोनितपुरस्य आरक्षी -अधीक्षक: च स्थानान्तरितौ जातौ । कारणमासीत् राजनीतिक- प्रतिनिधिभिस्सह तेषां पारिवारिकसम्बध: आसीत् । प्राशासकीयस्तरे सन्देहं निवारयितुं संचेतना-पदक्षेपनेन उभयोः जनपदयोः अधिकारिणौ स्थानान्तरितौ जातौ ।

प्रधानमन्त्री - लोकतन्त्र

प्रधानमन्त्रिणा नरेन्दर्मोदिना कथितं यत् भारतस्य पार्श्वे लोकतन्त्रस्य एका प्राचीना अक्षुण्णसंस्कृतिश्च स्त: । ह्य: सायं सीओलनगरे दक्षिण कोरियादेशेन आयोजिते लोकतन्त्र शिखरसम्मेलने आभासिय माध्यमेन भागं स्वीकुर्वन् असौ भणितवान् यत् मतैक्य-निर्माणं मुक्तवार्ता चर्चा च सम्पूर्णभारतस्य ऐतिह्ये प्रतिध्वन्यते । प्रधानमन्त्रिणा प्रकाशितं यत् भारतं केषाञ्चित् सप्ताहानाम् अनन्तरं लोकतन्त्रस्य बृहत्तमस्य उत्सवस्य साक्षी भविष्यति ।

असौ अग्रे प्रत्यपादयत् यत् एकार्बुद संख्याकानां मतदातृनाम् मतदानैः सह एव बृहत्तमा नैर्वाचिनिक प्रक्रिया भविता । भारतीय-जनाः पुनरेकवारं लोकतन्त्रे अस्मिन् स्वीयविश्वासं प्रकटयिष्यन्ति।

सूडानस्य

सूडानस्य सैनिकानाम् अर्धसैनिक-बलानां च मध्ये न्यूनातिन्यूनं एकवर्षात् प्रवर्तमानात् सङ्घर्षात् देशः विश्वस्य भीषणतमस्य खाद्यान्नसंकट-प्रभावित-देशस्य श्रेणीम् अध्यगच्छत् । संयुक्त-राष्ट्रस्य मानवतावादी-कार्यालयः सञ्चेतनां प्रदत्तवान् यत् कुपोषणं वर्धते अपि च अनेन शिशूनां जीवनं मृत्युमुखम् अध्यगच्छत् । मानवीयाभियानानां निदेशकः एडेम-वासोरनू इति एषः ह्यः संयुक्त-राष्ट्र-सुरक्षा-परिषदि प्रोक्तवान् यत् सूडानस्य एक-तृतीय-जनसंख्या पूर्वमेव गम्भीर-खाद्यासुरक्षां सम्मुखीकरोति ।

भाषानेट-अन्तर्जाल पटलम्

सूचना-प्रौद्योगिकीय सचिव: एस्-कृष्णन् अद्य नवदिल्ल्यां सार्वभौमिक-स्वीकृते: यूनिवर्सल-एक्सेप्टेंस इत्यस्या: अवधारणायां आधारितं भाषानेट इति अन्तर्जालपटलं उद्घाटितवान्। अत्रावसरे प्रवदन् सचिव: प्रोक्तवान् यत् अस्य अन्तर्जालपटलस्य अनावरणं भारतदेशे आंककीय-समावेशितां संवर्धयितु एकस्य महत्वपूर्णोक्रमस्य प्रतिनिधित्वं करोति। अथ च सार्वभौमिक-स्वीकृति: एतदर्थं अस्या: प्रतिनिधे: प्रवेशद्वारमस्ति।

भारत-संयुक्तराष्ट्रप्रारूपं

भारतेन अफ्रीकीय-वैश्विक-दक्षिणयो: प्रतिनिधित्वस्य न्यूनतां स्थायि-आसन-सदस्यतायां च किमपि अपरिवर्तनीयं इति द्वौ विषयौ उररीकृत्य सुरक्षापरिषदि संशोधनानां विरोधिणे संयुक्तराष्ट्रे यूनाइटेड-फॉर-कंसेंसस-यू.एफ्.सी इत्यस्य प्रारूपस्य आलोचना विहिता। संयुक्तराष्ट्रे भारतस्य स्थायि-प्रतिनिधि: रूचिरा-कम्बोज: यू.एफ्.सी. इत्येतस्य प्रारूपस्य कठोरालोचनां कृतवती। प्रोक्तवती च यत् संयुक्तराष्ट्रस्य अधिकांशै: सदस्य-देशै: समर्थितान् विचारान् विरूद्धय अस्ति ये विस्तारित-सुरक्षा-परिषद: स्थायि-स्थायितेर-श्रेणिषु विस्तारिता: सन्ति।

।। इति वार्ता: ।।